**दिनाङ्क : 06/07/2025** **सायम् - 06:20**

**आदौ-मुख्यवार्ता:**

- भारतं अर्जेन्टिना देशौ सामरिकसहभगितां इतोप्यधिकं सुदृढं कर्तुं व्यापार-रक्षां च समेत्य विविधक्षेत्रेषु सहकार्यं संवर्धनाय सहमतौ स्तः।
- प्रधानमंत्री नरेन्द्र मोदी निजपञ्चदेशानां यात्रायाः चतुर्थे चरणे अद्य प्रातः ब्राजील्-देशं प्राप्तवान्, ब्रिक्स-शिखरसम्मेलनस्य सप्तदश-संस्करणे भाग-ग्रहणाय।
- अद्य प्रातः कालादेव हिमाचलप्रदेशस्य अधिकांशभागेषु प्रचण्डवृष्टिः जायमानास्ति। ऋतुविभागेन नवमण्डलेषु आकस्मिक-जलाप्लवस्य सञ्चेतना प्रसारिता अस्ति।
- आशुरा-ए-मोहर्रम इत्यस्यस्य मुस्लिम धर्मावलम्बिन: पर्व श्रद्धया राष्ट्रस्य नैकेषु स्थलेषु परिपाल्यते।
- अमरीकीयेन उद्यमिना एलन मस्क इत्यनेन नूतन राजनीतिकदलस्य घोषणा कृता। अस्य उद्देश्यं द्विदलीय प्रणालियै समाह्वान-प्रदानं वर्तते।
- अमरीकायाः टेक्सासराज्ये सहसा आगतेन जलौघेन एकपञ्चाशत् जनाः मृताः, मृतकेषु पञ्चदश बालाः अपि सम्मिलिताः सन्ति।
- क्रिकेट्-क्रीडायां भारतं द्वितीय-टेस्ट्-क्रीडायाः अन्तिमे दिने षड्त्रिंशोत्तर पञ्च शत धवनांकैः अग्रे अस्ति।

**अथ वार्ताः विस्तरेण**

**प्रधानमंत्री-अर्जेंटीना**

ब्राज़ील्-देशस्य रियो-डि-जेनेरो स्थले अद्य ब्रिक्स-शिखरसम्मेलनस्य सप्तदशं संस्करणं समारभते। सदस्यदेशानां मध्ये सहयोगसंवर्धनार्थम् आयोज्यमाने एतस्मिन् शिखरसम्मेलने प्रधानमंत्री नरेंद्रमोदी सहभागितां समाचर्य विचार-विमर्शं करिष्यति। एतस्मिन् शिखरसम्मेलने वैश्विक-शासन-परिष्कारे, जलवायु-परिवर्तन-समाह्वानेषु, आर्टिफिशियल इंटेलिजेंस् इत्येतेन सम्बद्धेषु अथ अन्येषु अपि अनेकेषु प्रकरणेषु चर्चा भविष्यति। एतत् अतिरिच्य प्रधानमंत्री मोदी तत्र अन्यैः वैश्विकनेतृभिः समं द्विपक्षीयाः वार्ताः अपि करिष्यति इति सूच्यते। ध्येयं यत् द्विदिवसीये एतस्मिन् शिखरसम्मेलने सहभागानन्तरं प्रधानमन्त्री मोदी ब्रासीलिया-स्थलं गमिष्यति। एतस्मिन् यात्राकाले प्रधानमंत्री मोदी भारत-ब्राजील-देशयोः मध्ये सम्बन्धाः सुदृढाः कर्तुं ब्राजील्-देशस्य राष्ट्रपतिना लुइज़ इनासियो लूला दा सिल्वा इत्यनेन समं मन्त्रणां करिष्यति। अवधेयम् अस्ति यत् प्रधानमंत्री मोदी अर्जेंटीना-देशस्य सफलयात्रायाः अनन्तरं निजपञ्चदेशानां यात्रायाः चतुर्थे चरणे अद्य प्रातः ब्राजील्-देशस्य नगरं रियो डी जेनेरियो इत्यत्र

प्राप्तवान्। इतः पूर्वं, यात्रायाः तृतीये चरणे अर्जेंटीना-देशं प्राप्तवान् प्रधानमंत्री मोदी गतदिने तत्रत्यं राष्ट्रपतिं जेवियर मिले इत्येतं सम्मिल्य प्रतिनिधिमण्डल-स्तरीयां चर्चां कृतवान्। अत्र चर्चायां द्विपक्षीयसंबंधगतेषु अनेकेषु अपि प्रकरणेषु चर्चा समाचरिता आसीत्। तावत् ब्यूनस आयर्स इति स्थलात् गमनात् प्राक् प्रधानमंत्री मोदी तत्र महात्मागांधेः अथ गुरुदेवस्य रवींद्रनाथ-टैगोर-वर्यस्य प्रतिमयोः पुष्पांजलिम् अपि अर्पितवान् आसीत्।

**गुजरात-अमितशाहः-**

केन्द्रीयगृहसहकारितामन्त्री अमितशाहः देशस्य आर्थिकविकासं संवर्धयितुं सहकारिसंस्थानां महत्त्वपूर्णभूमिका-विषये बलं प्रदत्तवान्। अमितशाहः गुजरातराज्यस्य आणन्दस्थले अमुल्-समवायस्य अथ राष्ट्रियदुग्धविकासमण्डलस्य विविध-विकास-कार्याणाम् उद्घाटनं कृत्वा, सहकार-मन्त्रालयस्य चतुर्वर्ष-पूरित्यवसरे आयोजितं कार्यक्रमं सम्बोधयति स्म। एतस्मिन् अवसरे अमितशाहः प्रख्यातस्य विचारकस्य अथ शिक्षाविदः डॉ. श्यामा प्रसाद मुखर्जि-वर्यस्य जयन्तीम् उपलक्ष्य तस्मै श्रद्धांजलिम् अपि समर्पितवान्।

**एस् पी मुखर्जी पुष्पाञ्जलिः**

लोकसभा अध्यक्षः ओम बिरला, केन्द्रीय मन्त्री भारतीय-जनता-पार्टीति दलस्य राष्ट्रीयाध्यक्षः जगत प्रकाश नड्डा राज्यसभाया: उपसभापतिः हरिवंश नारायण सिंहः अन्यनेतारश्च संविधान-सदनस्य केन्द्रीयकक्षे भारतीयजनसंघस्य संस्थापकस्य डॉक्टर श्यामा प्रसाद मुखर्जी इत्यस्य पञ्चविंशत्युत्तरैकशत-तम-जयन्त्यवसरे तस्मै पुष्पाञ्जलिः अर्पितः। रेलमन्त्री अश्विनी वैष्णवः दिल्ल्याः मुख्यमन्त्री रेखा गुप्ता, संसद् सदस्यौ मनोज-तिवारी बांसुरी-स्वराजश्च दिल्ल्याः शहीदी पार्क इत्यत्र डॉक्टर मुखर्जी वर्यस्य प्रतिमायां पुष्पाञ्जलिं समर्पितवन्तः। अत्रावसरे श्रीवैष्णवेन भारतीयभाषाणां महत्त्वे डॉक्टर मुखर्जी वर्यस्य योगदानं प्रशंसितम्।

**राजनाथसिंहः**

रक्षामत्री राजनाथसिंहः श्वः नवदिल्ल्याम् ऐषमः नियन्त्रकसम्मलेनस्य उद्घाटनं करिष्यति। अस्य त्रिदिवसीय-सम्मेलनस्य आयोजनं रक्षा लेखा विभाग-डीएडी इति करिष्यति। एकस्मिन् वक्तव्ये रक्षा मन्त्रालयेन उक्तं यत् अस्मिन् सम्मेलने आयव्ययं लेखा-परिष्कारं आंतरिकलेखापरीक्षा पुनर्गठनं सहयोगी शोधः मूल्य-निर्धारण-नवाचारः क्षमता-निर्माण प्रभृति क्षेत्राणि समावेशस्य अष्टौ उच्चस्तरीय सत्राणि भविष्यन्ति। मन्त्रालयेन प्रोक्तं यत् एतेषु सत्रेषु प्रतिस्पर्धी आत्मनिर्भर रक्षा उद्योगाय रणनीतिकसहयोगेन सह राजकोषीय विवेकं संतुलितं कर्तुं एकीकृतवित्तीयपरामर्षकाणां उदीयमानाभूमिका अन्वेष्यते।

**विराम:**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम:**
**आकाशवाण्याः www.newsonair.gov.in वेबसाइट इत्यत्र, अथ newsonair मोबाइल ऐप इत्यत्र अपि उपलब्धो भविष्यति।**

**मुहर्रम**

आशुरा-ए-मोर्हरम इत्यस्यस्य मुस्लिम धर्मावलम्बिन: पर्व श्रद्धया राष्ट्रस्य नैकेषु स्थलेषु परिपाल्यते। इदं पर्व मुस्लिम सम्प्रदायस्य अवतारीभूतस्य मुहम्मदवर्यस्य प्रपौत्रस्य हज़रतइमाम हुसैनस्य आत्माहुतिदिवसत्वेन आयोज्यते। योहि सत्यस्य प्रतिस्थापनायै करबालाया: समरांगणे वीरगतित्वम् अवाप्तवान्। एतस्मिन् आयोजने मुस्लिम धर्मावलम्बिन: विशेषत:शियासम्प्रदायिका: ताजिया इत्याख्यया सुसज्जितया यात्रया सह बलिदानं स्मरन्, ददन् च अस्य पर्वण: पालनं कुर्वन्ति। प्रधानमन्त्री नरेन्द्रमोदी हजरत इमाम हुसैन इत्यस्य बलिदानं स्मारितवान्। सोशल मीडिया सन्देशे श्रीमोदी अवदत् यत् हजरत इमाम हुसैनः धर्मप्रतिबद्धतायाः उपरि बलं प्रदत्तवान्, जनान् प्रतिकूलतायाः सम्मुखे सत्यस्य समर्थनाय च प्रेरितवान्। अस्य अवसरस्य निमित्तं ताजिया शोभायात्राः बहिः निष्कासिताः सन्ति। दिल्ल्याः जामामस्जिद्, निजामुद्दीन, ओखला, मेहरौली इत्यादिषु विभिन्नेषु स्थानेषु मुहर्रम शोभायात्राः आयोज्यन्ते। मजलिसः अथवा धार्मिकसभाः अपि भवन्ति । देशस्य अन्येभ्यः भागेभ्यः अपि मुहर्रम-उत्सवः परिपाल्यते। अस्मै अवसराय विस्तृताः सुरक्षाव्यवस्थाः कृताः सन्ति।

**एलन-मस्क राजनीतिकदलम्**

अमरीकीयेन उद्यमी एलन मस्क इत्यनेन नूतन राजनीतिकदलस्य घोषणा कृता। अस्य राजनीतिक-दलस्य नाम अमरीका पार्टी भविष्यति। अस्य उद्देश्यं रिपब्लिकन अथ डेमोक्रेट पार्टी दलाभ्यां समाह्वान-प्रदानं वर्तते। स्वस्य सोशल मीडिया प्लेटफॉर्म एक्स इत्यत्र अमुना दलस्य घोषणां विधाय उभाभ्यां प्रमुख-दलाभ्याम् उपरि अनियन्त्रित-सर्वकारीय-व्ययस्य भ्रष्टाचारस्य च आरोपं स्थापितम्। अवधेयं यत् एलन मस्क इत्यस्य जन्म अमरीकायां नैव अभवत् अतः असौ राष्ट्रपति पदस्य प्रत्याशी नैव भवितुं शक्नोति।

**अमरीकायां जलौघः**

अमरीकायाः टेक्सासराज्ये सहसा आगतेन जलौघेन एकपञ्चाशत् जनाः मृताः। मृतकेषु पञ्चदश बालाः अपि सम्मिलिताः सन्ति। तीव्र-वर्षायाः कारणेन गुआडाल्यूप नद्याः जलस्तरं होरा त्रये त्रिंशत् फीट परिमितं वर्धितं येन एषा घटना दुरापादिता। इदानीं यावत् सार्ध अष्टशतं यावत् जनाः सुरक्षिताः। ऋतुविभागेन क्षेत्रे इतोऽपि अधिक-वर्षायाः आशङ्का प्रकटिता।

**हिमाचल प्रदेश-वृष्टि:**

अद्य प्रातः कालादेव हिमाचलप्रदेशस्य अधिकांशभागेषु प्रचण्डवृष्टिः जायमानास्ति। ऋतुविभागेन मण्डी, काङ्गरा, सिरमौरमण्डलेषु इतोपि प्रचण्डवृष्टिपरा रेड-अलर्ट-इत्याख्या सञ्चेतना प्रसारिता अस्ति। तत्रैव शिमला, सोलन, हमीरपुर इत्यादिषु नवमण्डलेषु आगामिषु चतुर्विंशति होरासु आकस्मिक-जलाप्लवस्य सञ्चेतना अस्ति। वर्षाधिक्यं निध्याय प्रशासनेन तत्र वासिभ्यः जनेभ्यः आवश्यकाः अनुपालनीयाः सञ्चेतनाः प्रदत्ताः सन्ति ।

## जलवायु

अद्य दिल्ल्याः केषुचित् भागेषु प्रचण्डवृष्ट्या तीव्र-तापेन च कथंचित् उपशमनं जातम्। तावत् आगामिदिनद्वये हरियाणा-चण्डीगढ-पञ्जाब-उत्तराखण्ड-हिमाचलप्रदेशेषु अपि एतादृशी ऋतुस्थितिः भविष्यति इति सम्भाव्यते। एतेषां क्षेत्राणां कृते ऋतुविभागेन मंगलवासरपर्यन्तं ऑरेंज अलर्ट इति नारङ्गवर्णीया संचेतना प्रसारिता अस्ति। तत्रैव ऋतुविभागेन मध्य-महाराष्ट्रस्य तटीयक्षेत्रेषु अपि आगामिदिनद्वये प्रचण्डवृष्टिः भविष्यति इति पूर्वानुमानं प्रकटितम् अस्ति।

## क्रिकेट

बर्मिंघम्-नगरस्य एज्बास्टन्-क्रीडाङ्गणे आतिथेय-इङ्ग्लेण्डदलं विरुध्य क्रिकेट्-क्रीडायां भारतं द्वितीय-टेस्ट्-क्रीडायाः अन्तिमे दिने षड्त्रिंशोत्तर पञ्चशत धवनांकैः अग्रे अस्ति। सम्प्रति इंग्लैंडदलेन जलपानावकाशं यावत् पञ्चक्रीडकाना हनौ पुरस्सरं दशाधिकैकशत् धावनांका: विरचिता:।